Aug 2009
(1)

# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीया परीक्षा

### प्रथमपत्रिका

दिनाङ्कः – ३०-८-२००९ | अङ्काः–१००

पूर्वाह्णे – १०-०० तः १-०० पर्यन्तम् | समयः–३-०० होराः

**1 एकवाक्येन संस्कृते उत्तरं लिखत । ( अष्टानामेव)** 1×8=8

१. बालिकायाः हस्ते किमासीत् ?

२. अचक्षुषां चक्षुः कः ?

३. शुकदम्पती कुत्र न्यवसताम् ?

४. तारकेण विप्रकृताः देवाः कुत्र ययुः ?

५. शङ्कराचार्यस्य माता का ?

६. कृतमुपकारं के न विस्मरन्ति ?

७. मल्लस्य नाम किम् ?

८. वाग्देवी कुत्र वसति ?

९. चित्रग्रीवः कः ?

१०. वृक्षच्छायायां प्रसुप्तः ब्राह्मणः किं दृष्टवान् ?

**2 वाक्यद्वयेन संस्कृतभाषया उत्तरं लिखत । (पञ्चानामेव)** 2×5=10

१. कीदृशाय शम्भवे नतिः ?

२. हनूमान् समुद्रस्योपरि किं किं चकार ?

३. नव गोप्यानि कानि ?

४. ब्राह्मणपुत्रः दीनारकं दृष्ट्वा किं चिन्तितवान् ?

५. कौशिकः कीदृशः द्विजः असीत् ?

६. एकलव्याय द्रोणः किमुत्तरं प्रायच्छत् ?

**3 संस्कृतभाषया उत्तरं लिखत। (त्रयाणामेव)** 3×3=9

१. कुत्र कुत्र मठाः स्थापिताः शङ्कराचार्यः ?



पश्चादनुवर्तते

Aug 2009

(2)

२. मल्लस्य सामर्थ्यं विशदयत ।

३. नयशास्त्रकर्तारः के ?

४. कुष्टव्याधिपरिपीडितः विप्रः राजानं विक्रममुपसृत्य किमवदत् ?

**4 मातृभाषया उत्तरं लिखत । (त्रयाणामेव)** 3x4=12

१ चतुर्मुखं ब्रह्माणं सर्वे देवाः कथं अस्तुवन् ?

२. चित्रग्रीवः कः ? सः स्वाश्रितान् कथं ररक्ष ?

३. आहारशुद्धौ-सत्वशुद्धिः अस्य पाठस्य सारांशं लिखत ।

४. कालिदासः कथं कवीनां चक्रवर्तीति परिगण्यते विक्रमेन लिखत ?

**5 ससन्दर्भं स्वोत्तरभाषया लिखत । (चतुर्णाम्)** 4x3=12

१. मनुष्याणां शरीरस्थो रिपुः क्रोधः ।

२. प्रभूतधनेन योजयिष्यामि ।

३. विधिरहो बलवानिति मे मतिः ।

४. ''त्वां लोकोत्तरं धनुर्धरं करिष्यामि'' ।

५. राघवः रावणं रणे हत्वा त्वां नेष्यति ।

**6 द्वयोःअन्वयानुसारम् अर्थं स्वेष्टभाषया लिखत ।** 2x3=6

१. प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः<br>
कि नु मे पशुभिस्तुल्यं किं नु सत्पुरुषैरिति ।।

२. अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखम् ।<br>
वागीशं वाग्भिरथ्याभिः प्रणिपत्योपतस्थिरे ।।

३. पादपं कञ्चिदारुह्य तत्पलाशैः सुसंवृतः ।<br>
आस्ते स्म मारुतिस्तत्र सीतेयमिति तर्कयन् ।।

**7 श्लोकद्वयं पूरयत ।** 2x2=4

१. शान्ताकारं .................................. लोकैकनाथम् ।।

२. जयन्ति ते ....................................... भयम् ।।

३. सुखार्थी वा ....................................... सुखम् ।।

Aug 2009

(3)

**8** **भाषान्तरं कुरुत :-** 5

अस्ति दाक्षिणात्ये जनपदे महिलरोप्यं नाम नगरम् । तत्र सकलकलापारंगतोऽमरशक्तिः नाम राजा बभूव । तस्य त्रयः पुत्राः परमदुर्मेधसो बहुशक्तिः उग्रशक्तिः अनन्तशक्तिः चेति बभूवुः ।

**9** **रिक्तस्थानं पूरयत ।** 1×4=4

१. राजन्, पूरिता मया ..................... ।

२. ..................... नाम प्रसिद्धः धनुर्वेदाचार्यः आसीत् ।

३. गर्जद्घना न .................. न गर्जन्ति घनाघनाः ।।

४. केवलं जगति तेऽपि ................ ।

**10** **समानार्थकपदं लिखत । (त्रयाणामेव)** 1×3=3

१. भर्ता २. सुमनाः ३. प्रथितः ४. आस्यम्

**11** **विरुद्धार्थकपदं लिखत (त्रयाणामेव) ।** 1×3=3

१. सूक्ष्मः २. भद्रम् ३. रिपुः ४. प्रकाशः

**12** **वाक्यं रचयत । (त्रयाणामेव)** 1×3=3

१. प्राक् २. उपसृत्य ३. एत्य ४. बभूव

**13** **सर्व पुरुषवचनेषु लिखत । (एकस्य)** 1×3=3

१. अमन्यत २. कारयामास ३. वेद

**14** **सन्धिं विभज्य नाम लिखत । (त्रयाणामेव)** 1×3=3

१. देवतेयं २. खल्विमाम् ३. हरिरयम् ४. जगद्गुरुः



पश्चादनुवर्तते

Aug 2009
(4)

**15 लोकोक्तिं पूरयित्वा अर्थं स्वोत्तरभाषया विवृणुत । (एकस्य)** 1x3=3

१. चक्रार ............................ भाग्यपंक्तिः ।

२. संभावितस्य ............................ रिच्यते ।

**16 व्याकरणविशेषं लिखत । (एकस्य)** 1x2=2

१. कपोतराजः २. वायसेन सह

**17 प्रयोगपरिवर्तनं कुरुत ।** 1x3=3

१. नाहं विद्या विक्रयं करोमि ।

२. बालकेन हस्यते ।

३. हरीशः शालां गतः ।

**18 वाक्य दोषं परिहरत ।** 1x2=2

१. रामेण सः सीता गतवती ।

२. सत्पुरुषाः सन्मार्गं न प्रविचलति ।

**19 समूहेतर पदं लिखत ।** 1x3=3

१. स्थूलः, जलम्, नीरम्, उदकम्

२. वसति, वसामि, वसथ, अवसत्

३. सखा, सुहृत्, मित्रः, मित्रम्

**20 कर्तृ-कर्म-क्रियापदानि सूचयत ।** 1x2=2

१. राजा सचिवान् प्रोवाच ।

२. अकार्यं कृतवानस्मि ।

★★★★★

Aug 2009
(5)

# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीया परीक्षा

### द्वितीयपत्रिका

दिनाङ्कः - ३०-८-२००९ | अङ्काः-५०
अपराह्णे - १-३० तः ३-०० पर्यन्तम् | समयः-सार्धैकहोरा

**1 दशाभिः वाक्यैः संस्कृतभाषया प्रबन्धमेकं लिखत :- (एकमधिकृत्य)** 1x5=5

१. दीपावली २. कावेरीनदी ३. उद्यानम्

**2 संस्कृतभाषया पत्रमेकं लिखत :-** 1x5=5

१. शालावार्षिकोत्सवम् आगन्तुं मित्राय पत्रम् ।
२. अनारोग्यकारणतः विरामं सम्प्रार्थ्य कक्ष्याध्यापकं प्रतिपत्रम्

**3 द्वयोः लक्षणं सोदाहरणं आङ्ग्लभाषया कर्णाटकभाषया वा लिखत।** 2x3=6

१. उपसर्गाः २. कर्तरि प्रयोगः ३. तुमुन्प्रत्ययः

**4 एकस्य रूपाणि सर्वविभक्ति वचनेषु लिखत ।** 1x4=4

१. अस्मद् २. मनस् ३. मातृ

**5 सर्वपुरुष वचनेषु लिखत । (द्वयोः)** 2x3=6

१. मोदते २. गच्छतु ३. हसिष्यति

**6 वाक्यदोषान् परिहरत :-** 1x3=3

१. मातुः सह पुत्री आपणं गच्छति । २. ग्रामस्य बहिः उद्यानं वर्तते ।
३. बालकाः पाठन् पठति ।

**7 प्रयोगं परिवर्तनं कुरुत :-** 1x3=3

१. नाहं विद्या विक्रयं करोमि । ३. पुत्रः पितरम् अनमत् ।
२. ब्राह्मणपुत्रेण सर्पः लगुडेन शिरसि ताडितः।



पश्चादनुवर्तते

Aug 2009
(6)

8 कृदन्तपदं चित्वा नाम लिखत :- 1x3=3

१. कपोताः धान्यानि भक्षयितुम् आगच्छन्ति ।
२. विप्राः नद्यां स्नात्वा गृहम् आगच्छन् ।
३. राधा रघुवंशं पठितवती ।

9 अन्यलिङ्गरूपं लिखत :- 1x3=3

१. पुत्री २. राजा ३. अस्य

10 वाक्यमेकं विवृणुत :- 1x2=2

१. विनाशकाले विपरीतबुद्धिः ।
२. जातस्य हि ध्रुवो मृत्युः ।

11 मातृभाषायाम् अनुवादं कुरुत :- 1x5=5

१. मयूराः मेघस्य नादं श्रुत्वा नृत्यन्ति ।
२. वत्सः पयः पातुं धेनोः समीपमधावत् ।
३. अस्माकं ग्रामे चिकित्सालं नास्ति ।
४. शिशुपालेन कृष्णः अनिन्द्यत ।
५. सीता वृक्षे उपविष्टं हनूमन्तं दृष्टवती ।

12 संस्कृतभाषया अनुवदत कुरुत :- 1x5=5

१. ನೀಲಿಯಾದ ಮೋಡವು ಆಕಾಶದಲ್ಲಿ ಸಂಚರಿಸುತ್ತದೆ.
A dark cloud moves on the sky.
२. ಹಿತವೂ ಮನೋಹರವೂ ಆದ ಮಾತು ದುರ್ಲಭ.
Good and pleasing words are rarely spoken.
३. ಸಿಂಹವನ್ನು ನೋಡಿ ಹೆದರಬೇಡ.
(You) Don't be afraid of the Lion.
४. ನೀನು ಚೆನ್ನಾಗಿ ಓದು.
You study hard.
५. ನಿಮ್ಮ ಶಾಲೆಯು ಎಲ್ಲಿದೆ ?
Where is your school ?

★★★★★